# 2019-20

## आदर्श-प्रश्न-पत्रम्- 2

## वार्षिकी परीक्षा

## कक्षा: दशमी

## विषय: संस्कृतम्

**समय:- 3 होराः** **पूर्णांका:- 80**

निर्देशा:- अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति |

प्रश्नानाम् उत्तराणि अस्मिन् प्रश्नपत्रे एव प्रदत्तस्थानेषु लेखनीयानि।

1. **खण्ड- क अपठित-अवबोधनम् ( 10अङ्का:)**
2. **खण्ड- ख रचनात्मक-कार्यम् (15 अङ्का:)**
3. **खण्ड- ग अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)**
4. **खण्ड- घ पठित-अवबोधनम् (30अङ्का:)**

## खण्ड:- क

## अपठितांश-अवबोधनम् -10 अंका:

**1.अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।**

क्रीडाकर्मणि लब्धपाटवानां शरीरम् अपूर्वं स्फूर्त्तिमयं भवति । येन ते स्फूर्तिमत्या विलक्षणया शक्त्या च सर्वा आपदो निस्तरन्ति। एषा क्रीडाया: सर्वप्रथमा उपयोगिता। क्रीडाया: साहचर्येण ते किं किं साधयन्ति इति अपरा उपयोगिता। क्रीडाया: महत्त्वं तथाविधमेवास्ति यथा नृपाय स्वमुकुटस्य महत्त्वं भवति। चक्रवर्ती सम्राट् यत् सुखं राज्यशासनेन लभते , तदेव सुखं क्रीडार्थी क्रीडायाम् । बाल्यावस्था प्रथमं क्रीडनाय, पश्चात् अन्यकार्याय भवति। व्यायाम: सर्वेषां सर्वाङ्गानि पोषयति , परं सर्वे तत् कर्त्तुं नेच्छन्ति । बाल्यावस्थाया: सर्वोत्तमा: व्यायामा: पादकन्दुकक्रीडा-यष्टिकन्दुकक्रीडादय: सन्ति, येषु बालका : प्रेरणां विना स्वकीयेन औत्सुक्येन प्रवृता भवन्ति । स्वास्थ्यलाभाय स्वस्य देशस्य च सम्मानसमृद्ध्यर्थं च क्रीडा महत्त्वाधायिनी भवति ।

**I.एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (निर्देशस्पष्टात्मकपदम् – अवबोधनात्मकप्रश्नः)** [1 x 2 =2]

(i) बाल्यावस्था सर्वप्रथमं किमर्थं भवति?

(ii) देशस्य सम्मानसमृद्ध्यर्थं क्रीडा कीदृशी भवति?

(iii) व्यायाम: कानि पोषयति?

**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (निर्देशस्पष्टात्मकपदम् – अवबोधनात्मकप्रश्नः)** [2 x 2 =4]

(i) क्रीडाया: सर्वप्रथमा उपयोगिता का?

(ii) क्रीडाया: महत्त्वं कीदृशम् अस्ति?

(iii) बाल्यावस्थायाः सर्वोत्तमाः व्यायामाः के?

**III. अनुच्छेदस्य कृते उचितं शीर्षकं लिखत(द्वित्रिशब्दात्मक-वाक्यम्- चिन्तनात्मकप्रश्नः)** [1]

**IV. भाषिकं कार्यम्| (केवलं प्रश्नत्रयम्) (एकपदेन ज्ञानात्मकप्रश्नः)** [1 x 3 =3]

(i) लभते - इति क्रियापदस्य कर्तृपदं किम्?

क . सम्राट् ख. सुखम् ग. शासनेन

(ii) सर्वोत्तमा: व्यायामा: - अनयो: पदयो: किं विशेष्यपदम्?

क . सर्वोत्तमाः ख. व्यायामाः ग. अनयोः

(iii) तनुम्- अस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम्?

क . देहम् ख. व्यायामः ग. शरीरम्

(iv) दुःखम्- अस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

क . सुखम् ख. व्यायामः ग. प्रयोगम्

## (खण्ड:-ख)

## (रचनात्मककार्यम्) 15 अंका:

**2.भवती कीर्त्ति:, कोलकातायां निवसति | 'भाषा-सङ्गम:' इति कार्यक्रमस्य विषये वर्णयन्त्या भवत्या उत्कलप्रदेशे निवसन्तीं सखीं ह्लितिकां प्रति लिखितं पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुन:लिखतु।** [1/2 x 10=5]

**(चिन्तनात्मकः प्रश्नः)**

बैरकपुरम्

कोलकातात:

तिथि:___________

अयि 1.___________ !

शुभाशंसा। अपि कुशलिनी भवती ? सर्वेऽपि परिवारजना : 2.____________ कृपया सुखोपेता : स्यु: इति आशासे। सखि ! अस्माकं विद्यालये अधुना 'भाषा सङ्गम :' इति कार्यक्रम : 3.____________ ।एष: भारतसर्वकारेण 4.____________प्रसारार्थं प्रारब्ध: । अनेन कार्यक्रमेण छात्रा : द्वाविंशतिसंख्यकानां भाषाणां ज्ञानार्जनं करिष्यन्ति ।अस्माकं विद्यालयस्य 5.________________ वयं प्रतिदिनं पञ्चवाक्यानि वदाम: ।अपिच अस्माभि: विविधानां6. ______________ नृत्यसङ्गीतानि प्रस्तूयन्ते। सर्वे ऽपि कार्यक्रमा : यू-ट्यूब् मध्ये 7.________________ सन्ति। तेषां अवलोकनेन भवत्या : अपि मनोरञ्जनेन साकं 8.___________ भविष्यति। अस्मिन् विषये कृपया 9.____________ निवेदयतु। अन्यत् सर्वगतं कुशलम्। सर्वेभ्य: प्रणामा:।

भवत्या: 10._____________

कीर्त्ति:

| मञ्जूषा | प्रार्थनासभायां, भाषाणां, ह्लितिके, ज्ञातिभ्य:, भगवत:, ज्ञानप्राप्ति:, प्रदेशानां, सखी, संरक्षिता:, प्रचलति |
|---|---|

**3. पञ्चसु संस्कृतवाक्येषु मञ्जूषाप्रदत्तपदसहायतया अधप्रदत्तं चित्रं वर्णयत ।(चिन्तनात्मकः प्रश्नः)** [1 x 5=5]



| मञ्जूषा - | बालमेला, उत्पीठिका, आपणा:, विद्यालयभवनम् , क्रीडनकानि, वृक्षा:, जना:, कारयानानि, पञ्जीकरणम्, भोजनव्यवस्था, आसन्दा:, नियुद्धार्थम् |
|---|---|

**अथवा**

**'वृक्षारोपणम्' इति विषयम् अधिकृत्य मञ्जूषाप्रदत्तपदसहायतया पञ्च- संस्कृतवाक्यैः अनुच्छेदम् एकं लिखत ।**
**(रचनात्मकानि पञ्चवाक्यानि - चिन्तनात्मकः प्रश्नः)** [1 x 5=5]

| मञ्जूषा- | वृक्षाणाम् , फलानि, छाया, परोपकार: , वातावरणम्, प्रदूषणम् , अम्लजानाम्, पथिका:, जलसेचनम् , नागरिकस्य , कर्तव्य: ,आरोपणम् |
|---|---|

**4. पञ्चवाक्यानां सरलसंस्कृतेन अनुवादं कुरुत ।(रचनात्मकानि पञ्चवाक्यानि -चिन्तनात्मकः प्रश्नः)** [1 x 5=5]

क) मैं यहाँ से चेन्नई जाऊँगा ।
ख) आप दोनों किस विद्यालय में पढते हैं ?
ग) वर्षाऋतु में घर से बाहर जाना उचित नहीं है ।
घ) हमेशा सत्य के मार्ग पर चलो ।
ङ) मन्दिर के सामने एक उद्यान है ।
च) राम रावण के लिये सक्षम थे ।
छ) आज वर्षा होगी |

**(खण्ड:-ग)**

## (अनुप्रयुक्तव्याकरणम्) 25 अंका:

**5.अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत ।** [1 x 4=4]

**(केवलं प्रश्नचतुष्टयम्) (चतुर्वाक्यात्मकः ज्ञानात्मकः प्रश्नः)**

(i) दुर्दान्तै: दशनै: जनग्रसनं स्यान्नैव ।

(ii) भवतो: +वंशस्य कर्त्ता कः?

(iii)तस्य सत् +चरित्रं   प्रशंसनीयम् ।

(iv) कथम् अन्य: कोऽपि राजा भवितुम् अर्हति ।

(v) वाङ्मयं तपः भवति ।

**6 अधोलिखित-वाक्येषु रेखांकित-पदानाम् समस्त-पदं विग्रहं वा लिखत-   (केवलं प्रश्नचतुष्टयम्) (चतुर्वाक्यात्मकः ज्ञानात्मकः प्रश्नः)** [1 x 4=4]

(i) माता आत्मन:वेदनाम्  कथयति |

(क) आत्मवेदना (ख)  आत्मवेदनाम् (ग) आत्मावेद्नाम

(ii) दशरथो नाम राज्ञ: पुत्र: वसति स्म |

(क)राजोपुत्र: (ख) राजापुत्र: (ग) राजपुत्र:

(iii) राजासनं दृष्ट्वा स: प्रसीदति |

(क)राजाया: आसनं (ख) राज्ञ:आसनं (ग) राजी आसनं

(iv) सुराणाम् अधिप: ताम्सुरभिम् अपृच्छत् |

(क)सुराधिप: (ख) सुरे धिप: (ग) सुरों धिप:

(v) वाष्पयानमाला सन्धावति  |

(क) वाष्पयानेषु माला (ख) वाष्पयानेभ्यः  माला   (ग) वाष्पयानानां माला

**7.रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यचित्वा लिखत ।**

**(केवलं प्रश्नचतुष्टयम्) (चतुर्वाक्यात्मकः ज्ञानात्मकः प्रश्नः)** [1 x 4=4]

(i) मानवस्य हृदि सहिष्णु +तल् स्यात् ।

(क) सहिष्णुताम्  (ख)  सहिष्णुतया    (ग) सहिष्णुता

(ii) जानामि तव चपलां   प्रकृतिम् ।

(क) चपल+टाप् (ख)चपल +तल्(ग) चपल +ङीप्

(iii) बुद्धि: सर्वदा बल +मतुप् भवति ।

(क) बलवान्                    (ख) बलवती      (ग) बलमती

(iv) भुवनेश्वरस्य ऐतिहासिकानां स्थलानां विषये ज्ञातुम् वयम् उत्सुका: ।

(क) ऐतिहास +ठक्(ख)इतिहास+मतुप्        (ग) इतिहास +ठक्

(v)  मनुष्य :समाज + ठक्प्राणीअस्ति|

(क) सामाजिक   (ख)  सामाजिकी     (ग) समाजक

**8 .वाच्यपरिवर्तने उचितं पदं चित्वा अधोलिखितं संवादं पुनलिखत । (ज्ञानात्मकः प्रश्नः)** [1 x 3=3]

नागरिक: - हे राजन् ! त्वत्त: किञ्चिद्  इच्छामि ।

राजा – मन्त्रिन् ! अनेन किम् _______________ इति पृच्छतु । (इष्यते /इच्छति/इच्छ्यते)

मन्त्री- आर्य ! त्वं राजकोषात् किं याचसे ?

नागरिक: -श्रीमन् ! ______________ भोजनार्थं धनं याच्यते ।     (अहम् /मया/मह्यम्)

राजा – अस्तु । तवानुरोध: ______________ ।           (स्वीक्रियते/स्वीकरोमि /स्वीकुर्वन्ति)

नागरिक: -श्रीमन् ! अहंकृतज्ञोऽस्मि ।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत।       (केवलं त्रयाणाम्)**

(क) छात्र: श्लोकं लिखति ।

(ख) बालिकया अहं दृश्ये ।

(ग) पिता उपदेशं ददाति ।

(घ) यूयं किं कुरुथ?

**9.अङ्कानां स्थाने संस्कृतपदैः समयं लिखित्वावाक्यानि पुनः लिखत ।(केवलं प्रश्नचतुष्टयम्)**            [1x 4 =4]

**(चतुर्वाक्यात्मकः स्मृत्यात्मकः प्रश्नः)**

(क) प्रातः 6:00 वादने ..............................तीस्ता-तोर्सा एक्सप्रेस आगच्छति ।

(ख)अपराह्ने 4:30 वादने ...................................कामरुप -एक्सप्रेस गच्छति ।

(ग) रात्रौ 10:45वादने.................................. प्रयागराज एक्सप्रेस प्रस्थानं करोति ।

(घ) रात्रौ 12:15 वादने .................................. पदातिक – एक्सप्रेस गच्छति ।

(ङ) राजेन्द्रः 9:00 वादने.......................... शयनं करोति |

**10.मञ्जूषाप्रदत्तै: उचितै: अव्ययपदै: अधोलिखितेषु वाक्येषु रिक्तस्थानानि पूरयत ।**          [1/2x6=3]

**(केवलं प्रश्नषट्कम्) (अवबोधनात्मकप्रश्नः)**

(क) अहम् ________________ ग्रामं अगच्छम् ।

(ख) छात्रा: _______________ अधावन् ।

(ग) अविद्यस्य ______________ धनम् ?

(घ) ______________ कः समयः ?

(ङ) ______________ विदधीत न क्रियाम् ।

(च ) इदानीं ---------------- वर्षा कालः अस्ति |

(छ) समुद्रे वृष्टि ---------------- भवति |

| | |
|---|---|
| मञ्जूषा- | सहसा, सम्प्रति, इतस्ततः , कुतः , ह्यः , वृथा , तत्र |

**11.अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धं अस्ति।मञ्जूषात:शुद्धं पदं चित्वा संशोध्य पुनःलिखत|**

**(केवलं प्रश्नत्रयम्) (अवबोधनात्मकप्रश्नः)**                    [1 x 3 =3]

(क) अहं छात्र: <u>अस्ति</u> ।(असि / अस्मि/ स्म:)

(ख) प्रधानमन्त्री श्व: काश्मीरम् <u>अगच्छत्</u> ।(गमिष्यति / गच्छति / गच्छेयम्)

(ग) मम <u>चत्वार:</u> मित्राणि सन्ति ।   (चत्वारि /चतुर्षु/चतस्र:)

(घ) सुरेशः उन्नतम् अस्ति | (उन्नताः / उन्नतः / उन्नती )

**(खण्ड: घ)**

**(पठित – अवबोधनम्)** **30 अंका:**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत ।** (5)

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ।तयोः बलीवर्दयोः एकः शरीरेण दुर्बल : जवेन गन्तुम् अशक्तः चासीत् ।अत : कृषक: तं दुर्बलं वृषभं तोदनेन नुद्यमान : अवर्तत ।स: ऋषभ: हलमूढ्वागन्तुमशक्त: क्षेत्रे पपात। क्रुद्धः कृषीवल: तमुत्थापयोतुं बहुवारं यत्नम् अकरोत् ।तथापि वृष : नोत्थित: ।भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातु : सुरभे: नेत्राभ्याम् अश्रूणि आविरासन् ।सुरभेरिमाम् अवस्थां दृष्ट्वा सुराधिप: ताम् अपृच्छत् -"अयि शुभे ! कथमेवं रोदिषि ? उच्यताम्" इति ।

**I. एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्) (निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [$^1/_2$x2 =1]

(i) क: क्षेत्रकर्षणं कुर्वन् आसीत्?

(ii) ऋषभ: कुत्र पपात?

(iii) सुराधिपः काम् अपृच्छत् ?

**II. पूर्णवाक्येन उत्तरत।(केवलं प्रश्नमेकम्)(निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [1x 1 =1]

(i) किं दृष्ट्वा सुरभे: नेत्राभ्याम् अश्रुणि आविरासन्?

(ii) सुराधिपः किम् अपृच्छत् ?

**III.भाषिककार्ये प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत-**

**(केवलं प्रश्नत्रयम्) (एकपदेन ज्ञानात्मकप्रश्नः)** [1x 3 =3]

(क) सबलम्- इत्यस्य किं विपर्ययम् अनुच्छेदे प्रयुक्तम् ?

(i) दुर्बलम् (ii)ऋषभ: (iii) अश्रुणि

(ख) कृषीबल:- इति पदस्य किं विशेषणम् अनुच्छेदे प्रयुक्तम् ?

(i) सुरभि: (ii) क्रुद्ध: (iii) बहुवारम्

(ग) अपृच्छत्- इत्यस्य कर्तृपदम् किम् ?

(i) स्वपुत्रम् (ii) दृष्ट्वा (iii) सुराधिप:

(घ) ' अनेकवारम् ' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(i)नुद्यमानः (ii) बहुवारम् (iii) तथापि

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत ।**

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ॥
शुचिपर्यावरणम् ।

**I. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)(निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [1/2 x 2 =1]

(i) किं भृशं दूषितम् अस्ति?

(ii) किं निर्मलम् नास्ति?

(iii) कुत्र शुद्धीकरणं करणीयम् ?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)(निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [1 x 1 =1]

(i) किं करणीयम् अस्ति ?

(ii) धरातलं कीदृशमस्ति ?

**III. भाषिककार्ये प्रदत्तविकल्पेभ्यःउचितम् उत्तरं चित्वा लिखत ।** [1x 3 =3]

**(केवलं प्रश्नत्रयम्) (एकपदेन ज्ञानात्मकप्रश्नः)**

(क) बहिः- इत्यस्य किं विपर्ययम् श्लोके प्रयुक्तम् ?

(i) अन्तः (ii) बहु (iii) भृशम्

(ख) समलम्- इति विशेषणस्य विशेष्यं किम् ?

(i) भक्ष्यम् (ii) वस्तु (iii) धरातलम्

(ग) "करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्" अस्मिन् वाक्ये क्रियापदं किम् ?

(i) करणीयं (ii) जगति (iii) शुद्धीकरणम्

(घ) "दूषितं" इत्यस्य किं विलोम पदं श्लोके प्रयुक्तम् ?

(i)समलम् (ii) निर्मलम्(iii) शरीरम्

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत । (5)

रामः – एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि–क्षत्रियकुल–पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?

लवः – भगवन् सहस्रदीधितिः।

रामः – कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः – भ्रातरावावां सोदर्यौ।

रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः – आवां यमलौ।

रामः – सम्प्रति युज्यते। किं नामधेयम्?

लवः – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि *(कुशं निर्दिश्य)* आर्योऽपि गुरुचरणवन्दनायाम् ...............................

कुशः – अहमपि कुश इत्यात्मानं श्रावयामि।

रामः – अहो! उदात्तरम्यः समुदाचारः।
किं नामधेयो भवतोर्गुरुः?

**I . एकपदेन उत्तरत ।(केवलं प्रश्नद्वयम्)(निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [1/2 x2=1]

(i) कः कौतुहलेन पृच्छति?

(ii) लवस्य वंशस्य कर्त्ता कः?

(iii) “आवां यमलौ” इति कः कथयति ?

**II. पूर्णवाक्येन उत्तरत| (केवलं प्रश्नमेकम्)(निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः)** [1 x 1=1]

(i) रामस्य वन्दनायां लव: किं कथयति?

(ii) कुशः किं कथयति ?

**III. भाषिककार्ये प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।** [1x 3 =3]

**(केवलं प्रश्नत्रयम्) (एकपदेन ज्ञानात्मकप्रश्नः)**

(क) समरूप:-इत्यस्य किं विशेष्यपदम् नाट्यांशे प्रयुक्तम् ?

(i) शरीरसन्निवेश: (ii) वयस: (iii) यमलौ

(ख) श्रावयामि - इत्यस्य क्रियापदस्य कर्तृपदम् किम् ?

(i) अहम् (ii) मया (iii) तेन

(ग) ‘सूर्य:’ इत्यर्थे किं पदम् प्रयुक्तम् ?

(i) सोदर्यौ (ii) सहस्रदिधिति: (iii) भगवन्

(घ) “वपुः” इत्यर्थे किं पदं प्रयुक्तम् ?

(i)शरीरः (ii) प्रकाशः (iii)नामधेयः

15. **रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्टयम्) (एकवाक्यात्मकः ज्ञानात्मकः प्रश्नः)** [1x4=4]

(क) शकटीयानं <u>कज्जलमलिनं</u> धूमं मुञ्चति ।

(ख) त्वं <u>मानुषात्</u> बिभेषि ।

(ग) अरय: <u>व्यायामिनं</u> न अर्दयन्ति ।

(घ) धेनूनां माता <u>सुरभि:</u> आसीत् ।

(ङ) <u>सुराधिपः</u> ताम् अपृच्छत् |

16. **मञ्जूषाप्रदत्तपदैः अधोलिखितयोः श्लोकयोः अन्वयं पूरयत (त्रिचतुर्वाक्यानि अवबोधनात्मकः प्रश्नः)** [1/2x8=4]

(क) **सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।**
**यदि दैवात् फलं नास्ति छाया केन निवार्यते।।**

अन्वय: - फलच्छायासमन्वित: (i) ______________ सेवितव्य: । (ii) _____________ यदि फलं (iii) _________ (वृक्षस्य) (iv) ____________ केन निवार्यते ।

ख) **इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा ।**
**व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः ॥**

अन्वयः - इति उक्त्वा (i)__________ व्याघ्रमारी तूर्णं (ii) _________ । गलबद्धशृगालक : (iii)____________ अपि (iv)____________नष्ट: ।

| मञ्जूषा- | दैवात्, भयङ्करा, व्याघ्रः, महावृक्षः, छाया, सहसा, नास्ति, धाविता |
|---|---|

**17.घटनाक्रमानुसारं वाक्यानि पुन: लिखत । (स्मृत्यात्मकः प्रश्नः)** [$^1/_2$ x 8 =4]

क) तत्र राजसिंहः नाम राजपुत्रः वसति स्म

ख) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्र्ट्यात् पुत्रौ चपेटया प्रहृतवती ।

ग) अस्ति देउलाख्यो ग्रामः ।

घ) इति श्रुत्वा व्याघ्रमारी काचिदियमपि मत्वा व्याघ्रो भयाकुलचित्तो नष्टः ।

ङ) सा जगाद च–"कथमएकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?

च) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।

छ) अयमेकस्तावद्विभज्य भुज्यताम्।पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।

ज) एकदा तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

**18. समानार्थकशब्दान् मेलयित्वा लिखत ।(केवलं प्रश्नत्रयम्) (एकपदात्मकम् स्मृत्यात्मकः प्रश्नः)** [1x3 =3]

| (क) | (ख) |
|---|---|
| i) आयास: | चन्द्र: |
| ii) हिमकर: | अश्व: |
| iii) तुरङ्ग: | परिश्रम: |
| iv) करी | गजः |

**अथवा**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत| (केवलं प्रश्नत्रयम् )**

(i) एकान्ते <u>कान्तारे</u> क्षणमपि संचरणम् स्यात् |

(क) वने (ख ) जने (ग ) गहने

(ii) छलेन कृरतया बराकान् <u>मीनान्</u> भक्षयसि |

(क) वरेन्यान् (ख ) मत्स्यान् (ग) भक्तान्

(iii) यः इच्छत्यात्मनः श्रेयः <u>प्रभूतानि</u> सुखानि च |

(क) बहूनि (ख) प्रभावपूर्णानि (ग ) पञ्चभूतानि |

(iv) वने सा एकं व्याघ्रं <u>ददर्श</u> |

(क) दृष्टवान् (ख ) दष्ट्वान् (ग ) उपदिष्टवान् |